# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-३ (SEM-6) | **प्रश्नपत्रम् – ३** | गुणाः - ७० |
| विषयः – साहित्यशास्त्रम् | ---- | समयः - ११ तः २ |
| दिनाङ्कः – १९/४/२०१६ | सन्दर्भग्रन्थः – किरातार्जुनीयम् (१-२ सर्गौ मल्लिनाथटीकासहितम्) | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **एकस्य निबन्धात्मकमुत्तरं लेख्यम् ।** | ०८ |
| | (१) किरातार्जुनीयमहाकाव्यस्य महाकाव्यत्वेन मूल्याङ्कनं कुरुत ।<br>(२) भारवेः जीवनपरिचयः लेख्यः । | |
| **प्रश्नः -२** | **टिप्पणीद्वयं लेख्यम् ।** | ०८ |
| | (१) किरातार्जुनीयस्य कथासारः ।<br>(२) मल्लिनाथपरिचयः ।<br>(३) किरातार्जुनीयस्य शीर्षकम् ।<br>(४) भारवेः वैशिष्ट्यम् । | |
| **प्रश्नः -३** | **चत्वारः प्रश्नाः एकैकवाक्यद्वारा समाधेयाः ।** | ०४ |
| | (१) किरातार्जुनीयस्य अङ्गीरसः कः ?<br>(२) कति सर्गाः महाकाव्येऽस्मिन् ?<br>(३) अस्य महाकाव्यस्य मुख्यः नायकः कः ?<br>(४) किरातः कः ?<br>(५) पञ्चमहाकाव्यानि कानि ? नामानि लिखत । | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः – ४** | **द्वयोः ससन्दर्भं मल्लिनाथटीकानुगुणं व्याख्या विधेया ।** | ०८ |
| | (१) कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ।<br>न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥<br>(२) स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ।<br>मखेष्वखिन्नोऽनुमतः पुरोधिया धिनोति हृदयेन हिरण्यरेतसम् ॥<br>(३) विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम् ।<br>व्रजन्ति शत्रूनवधूयष निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥ | |
| **प्रश्नः -५** | वनेचरस्योक्तयः श्लोकोल्लेखपूर्वक लेख्याः तथा तस्य महत्त्वं च प्रतिपादनीयम् ।<br>अथवा<br>मङ्गलश्लोकं विलिख्य मल्लिनाथटीकानुसारं तस्य व्याख्या, भावार्थश्च लेख्यौ । | ०८ |
| **प्रश्नः -६** | **टिप्पणीद्वयं नातिविस्तरेण लेख्यम् ।** | ०४ |
| | (१) प्रथमसर्गस्य सारांशः । | |

| | | |
|---|---|---|
| | (२) किं प्रभुः कः ? इत्यस्य विवेचनमपि करणीयम् ।<br>(३) प्रथमसर्गस्य विशेषताः । | |
| **प्रश्नः -७** | **पञ्चप्रश्नाः एकैकवाक्यद्वारा समाधेयाः ।** | ०५ |
| | (१) द्रुपदात्मजा का ?<br>(२) प्रथमसर्गे कति श्लोकाः ?<br>(३) प्रथमसर्गान्ते किं छन्दः ?<br>(४) युधिष्ठिरः कुत्र निवसति स्म ?<br>(५) सुयोधनः केन जगतीं जेतुं समीहते ?<br>(६) "मेदिनी" अर्थात् किम् ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -८** | **द्वयोः ससन्दर्भं मल्लिनाथटीकानुगुणं व्याख्या विधेया ।** | ०८ |
| | (१) विधुरं किमतःपरं परैरवगीतां गमिते दशामिमाम् ।<br>अवसीदति यस्तुरैरपि त्वयि सम्भावितवृत्तिपौरुषम् ॥<br>(२) उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः ।<br>अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम् ॥<br>(३) सहसोपगतः सविस्मयं तपसां सूतिरसूतिरापदाम् ।<br>ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसंचयः ॥ | |
| **प्रश्नः -९** | द्वितीयसर्गस्य सूक्तिवैभवम् उल्लेखपूर्वकं प्रतिपादयत ।<br>अथवा<br>द्वितीयसर्गस्य विशेषताः श्लोकोल्लेखपूर्वकं प्रतिपादनीयाः । | ०८ |
| **प्रश्नः -१०** | **टिप्पणीद्वयं लेख्यम् ।** | ०४ |
| | (१) युधिष्ठिरः (२) द्रौपदी (३) भीमस्योक्तिः | |
| **प्रश्नः -११** | **पञ्चप्रश्नाः एकैकवाक्यद्वारा समाधेयाः ।** | ०५ |
| | (१) "सहसा विदधीत न क्रियाम्" इति कस्योक्तिः ?<br>(२) "कमलाकरः" शब्दस्य कोऽर्थः ?<br>(३) द्वितीयसर्गे किं छन्दः ?<br>(४) बलवानपि कोपजन्मस्तमको नाभिभवं रुण्स्द्धि यः इति कस्योक्तिः ?<br>(५) "बहुच्छलाः" शब्दस्य कोऽर्थः ?<br>(६) कति श्लोकाः द्वितीयसर्गे ? | |

✳✳✳